# ભારતીસ્તવનમ્ અથવા સરસ્વતીસ્તોત્રમ્

Bharatistavanam or Sarasvatistotram

sanskritdocuments.org

April 14, 2018

# Bharatistavanam or Sarasvatistotram

# ભારતીસ્તવનમ્ અથવા સરસ્વતીસ્તોત્રમ્

## Sanskrit Document Information

Text title : bhAratIstavanam

File name : bhAratIstavanam.itx

Category : devii, jaina, sarasvatI

Location : doc_devii

Author : Janimegha

Transliterated by : DPD

Proofread by : DPD

Latest update : April 14, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 14, 2018

*sanskritdocuments.org*

# ભારતીસ્તવનમ્ અથવા સરસ્વતીસ્તોત્રમ્

જાનીમેઘેન લિખિતમ્

શ્રી શારદાયૈ નમઃ ।
અન્તઃ કુણ્ડલિનિપ્રસુપ્તભુજઙ્ગાકારસ્ફુરદ્વિગ્રહાં
શક્તિં કુણ્ડલિનીં વિધાય મનસા હુઙ્કારદણ્ડાહતામ્ ।
ષટ્ચક્રાણિ વિભિદ્ય સદ્ય મનસાં પ્રદ્યોતનદ્યોતનીં
લીનાં બ્રહ્મપદે શિવેન સહિતામેકત્ર લીનાં સ્તુમઃ ॥ ૧॥

કન્દાત્કુણ્ડલિનિ ! ત્વદીયવપુષા નિર્ગત્ય તન્તુત્વિષા
કિઞ્ચિચ્ચુમ્બિતમમ્બુજં શતદલં તદ્બ્રહ્મરન્ધ્રાદ્ધ્વઃ ।
યશ્ચન્દ્રદ્યુતિ ! ચિન્તયત્યવિરતં ભૂયોઽત્ર ભૂમણ્ડલે
તન્મન્યે કવિચક્રવત્તિપદવીચ્છત્રચ્છલાદ્વલ્ગતિ ॥ ૨॥

યસ્ત્વદ્વક્ત્રમૃગાઙ્કમણ્ડલમિલત્કાન્તિપ્રતાનોચ્છલત
ચચ્ચચ્ચન્દ્રકચક્રચિત્રિતકકુપ્કન્યાકુલં ધ્યાયતિ ।
વાણી વાણિવિચિત્રભઙ્ગુરપદપ્રાગલ્ભયશૃઙ્ગારિણી
નૃત્યત્યુન્મદનર્ત્તકીવ સરસં ત્વદ્વત્રરઙ્ગાઙ્ગણે ॥ ૩॥

દેવિ ! ત્વત્પદચન્દ્રકાન્તકરકશ્ચ્યોતત્સુધાનિર્ઝર-
સ્નાનાનન્દતરઙ્ગિતઃ પિબતિ યઃ પીયૂષધારારસમ્ ।
તારાલઙ્કૃતચન્દ્રશુક્તિકુહરેણાકણ્ઠમુત્કણ્ઠિતો
વક્ત્રેણોદ્ગિરતીવ તે પુનરસૌ વાણીવિલાસચ્છલાત્ ॥ ૪॥

ક્ષુભ્યત્સીરસમુદ્રનિર્ગતમહાશેષાહિલોકાત્ફણા
પત્રોત્રિદ્રસિતારવિન્દકુહરે ! ચન્દ્રસ્ફુરત્કણિકે ! ।
દેવિ ! ત્વાં ચ નિજં ચ પશ્યતિ વપુર્યઃ કાન્તિભિન્નાન્તરં
બ્રાહ્મિ ! બ્રહ્મવિદસ્ય વલ્ગતિ વચઃપ્રાગલ્ભ્યદુગ્ધામ્બુધે ॥ ૫॥

નાભીપાણ્ડુરપુણ્ડરીકકુહરે હૃત્પુણ્ડરીકે ગલ-

ત્પીયૂષદ્રક(વ) વર્ષ(ર્ષિ) ણિ ! પ્રવિશતીં ત્વાં માત્રિક્ષમાલિનીમ્ ।
દૃષ્ટ્વા ભારતિ ! ભારતી પ્રભવતિ પ્રાયેણ પુંસો યયા
નિર્ગ્રન્થોઽપિ શતાન્યપિ ગ્રથયતિ ગ્રન્થાયુતાનાં નરઃ । ૬॥

ત્વાં મુક્તામયસર્વભૂષણધરાં શ્વેતામ્બરાડમ્બરાં
ગૌરીં ગૌરિસુધાં તરઙ્ગધવલામાલોક્ય હૃત્પઙ્કજે ।
વીણાપુસ્તકમૌક્તિકાક્ષવલય શ્વેતાબ્જવલ્ગત્કરાં
ન સ્યાત્કઃ શુચિવૃત્તચક્રરચનાચાતુર્યચિન્તામણિઃ ॥ ૭॥

અશ્યેત્સ્વાં તનુમિન્દુમણ્ડલગતાં ત્વાં ચાભિતો મણ્ડિતાં
યો બ્રહ્માણ્ડકરણ્ડપિણ્ડિતસુધાડિણ્ડીરપિણ્ડૈરિવ ।
સુસ્વચ્છોદ્ગતિગદ્યપદ્યલહરીલીલાવિલાસામૃતૈઃ
સાનન્દાસ્તમુપાચરન્તિ કવયશ્ચન્દ્રં ચકોરા ઇવ ॥ ૮॥

તદ્વેદાન્તશિરસ્તદોઙ્કૃતિમુખં જ્યોતિઃકલાલોચનં
તત્તદ્વેદભુજં તુ(ત) દાત્મહૃદયં તદ્ગદ્યપદ્યાં હિ ચ ।
યસ્ત્વદ્વર્ષ્મ વિભાવયત્યવિરતં વાગ્દેવિ ! તદ્વાઙ્ગમયં
શબ્દબ્રહ્મણિ નિષ્ઠિતઃ સ પરમબ્રહ્મૈકતામશ્નુતે ॥ ૯॥

વાગ્બીજં સ્મર બીજવેષ્ટિતમતો જ્યોતિઃકલાભૃદ્બહિ-
રષ્ટદ્વાદશષોડશદ્વિગુણિતદ્વિષ્ટાબ્જપત્રાન્વિતમ્ ।
તદ્બીજાક્ષરકાદિવર્ણરચિતાન્યગ્રે દલસ્યાન્તરે
હંસઃ કૂડ(ટ) યુતં ભવેદવિતથં યન્ત્ર તુ સારસ્વતમ્ ॥ ૧૦॥

ૐ હ્રીઁ શ્રીઁ સ(હ) હ્રીઁ સબીજકલિતાં વાગ્વાદિનીદેવતાં
ગીર્વાણાસુરપૂજિતામનુદિનં કાશ્મીરદેશે ભવામ્ ।
અશ્રાન્તં નિજભક્તિશક્તિવશતો યો ધ્યાયતિ પ્રસ્ફુટં
બુદ્ધિજ્ઞાનવિચારસારમહિતઃ સ્યાદ્દેવ્યસૌ સામ્પ્રતમ્ ॥ ૧૧॥

સ્મૃત્વા યન્ત્રં સહસ્રચ્છદકમલમનુધ્યાય નાભીહૃદોત્થં
ચેતઃસ્નિગ્ધોર્ધ્વનાલ હૃદિ ચ વિકચિતાં બાષ્પનિર્યાતના સ્યાત્ ।
તન્મધ્યે ચોર્ધ્વરૂપામભયદવરદાં પુસ્તકામ્ભોજપાણીં
વાગ્દેવીં તન્મુખાચ્ચ સ્વમુખમનુગતાં ચિન્તયેદક્ષરાલીમ્ ॥ ૧૨॥

કિમિહ બહુવિકલ્પૈશ્ચિન્તિતૈર્યસ્ય કણ્ઠે
લુઠતિ વિમલવૃત્તસ્થૂલમુક્તાવલીયમ્ ।
ભવતિ ભવતિ નાથે ભવ્યભાષાવિશેષૈ-

ર્મધુરમધુસમૃદ્ધસ્તસ્ય વાચાં વિશેષઃ ૧૩ ॥

ઇતિ શ્રીજાનીમેઘેન લિખિતં શ્રીભારતીસ્તવર્નં સમ્પૂર્ણમ્ ।

પ્રશસ્તિઃ
યદક્ષરપરિભ્રષ્ટં સ્વરવ્યઞ્જનવર્જિતમ્ ।
તત્સર્વં ક્ષમતાં દેવિ ! પ્રસીદ પરમેશ્વર ।

॥ જાનીમેઘેન લિખિતમ્ - સુમતિધીરગણિપઠનાર્થમ્ ॥ શ્રી ॥

Encoded and proofread by DPD

*Bharatistavanam or Sarasvatistotram*
pdf was typeset on April 14, 2018

Please send corrections to *sanskrit@cheerful.com*